# *वाऽसरूपोऽस्त्रियाम्* इति सूत्रविमर्शः

खेमराजखनालः *
विद्यावारिधिः

**सारः**

*वाऽसरूपोऽस्त्रियाम् (पा.सू. ३।१।९४) इति परिभाषासूत्रमस्ति । धात्वधिकारे कृदन्तप्रकरण एतत् सूत्रमुपकरोति । स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वाऽस्मिन् धात्वधिकारेऽसमानरूपोऽपवादः प्रत्यय उत्सर्गप्रत्ययस्य विकल्पेन बाधको भवति इत्यस्य सूत्रस्यार्थो विद्यते । मुख्यतः कृदन्तेषु प्रत्ययविधायकेषु सूत्रेषु सूत्रमिदं प्रवर्तते । अस्य सूत्रस्यानुसारेण अण्-कौ समानरूपौ प्रत्ययौ स्तः । णकारककारयोरित्संज्ञया अण्-कयोः प्रत्यययोरवशेषः 'अ' एव भवति । अतः आतोऽनुपसर्गे कः (पा.सू. ३।२।३) इति सूत्रं कर्मण्यण् (पा.सू. ३।२।१) इतिसूत्रेण नित्येन बाध्यते । तव्यत्तव्यानीयरः (पा.सू. ३।१।९६) इतिसूत्रेण विहितौ तव्यानीयरौ प्रत्ययौ भिन्नरूपकौ भवतः । एतस्मात् इमौ विकल्पेन बाधकौ वर्तेते । एतेन भवितव्यम्, भवनीयम् एते द्वे रूपे सिध्यतः । अत एव सूत्रमिदं सिद्धान्तकौमुद्याम् कृत्प्रत्ययस्यादावेव पठितमस्ति ।*

**शब्दकुञ्जिका -** असरूपः, उत्सर्गः, अपवादः, धात्वधिकारः ।

## १. विषयपरिचयः

'वा, असरूपः, अस्त्रियाम्' इतिच्छेदः । त्रिपदमिदं सूत्रम् । 'वा' इति विकल्पबोधकोऽव्ययः शब्दः, 'उपमायां विकल्पे वा सामि त्वर्धे जुगुप्सिते' इत्यमरकोषात् (सिंहः, १९९६; श्लोकः २८३६) । समानं चैतद् रूपमिति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.सू. २।१।५७) इतिसूत्रेण कर्मधारयसमासे 'समानस्य च्छन्दस्य मूर्धप्रभृत्युदर्केषु' (पा.सू. ६।३।८४) इतिसूत्रेण समानशब्दस्य स्थाने साऽदेशे 'सरूपम्' इतिपदं निष्पद्यते । अविद्यमानं सरूपं यस्येति विग्रहे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' (दीक्षितः, १९८२; पृ. २४३) इतिवार्तिकेन बहुव्रीहिसमासे विद्यमानपदलोपे प्रातिपदिकसंज्ञायां सुपो लुकि प्रथमाविभक्तौ एकवचने 'असरूपः' इतिपदं सम्पद्यते । न स्त्रियामिति विग्रहे 'नञ्' (पा.सू. २।२।६) इतिसूत्रेण नञ्समासे 'अस्त्रियाम्' इति सिध्यति । अत्र 'धातोः' (पा.सू. ३।१।९१) इतिसूत्रतो धात्वधिकारः प्रचलति । 'उत्सर्गस्य बाधकः' इतिपदमप्यत्राध्याह्रियते । अतोऽस्यार्थ एतादृक् सम्पद्यते, 'अस्मिन् धात्वधिकारेऽसरूपोऽपवादः प्रत्यय उत्सर्गस्य बाधको वा स्यात्, स्त्र्यधिकारोक्तं विना' इति (दीक्षितः, १९८२; पृ. ५५९) । धातोः प्रत्यय एव विधीयते, अस्मादत्र प्रत्ययपदमागतम् । स्यादिति क्रिया च स्वाभाविक्यध्याहता । 'स्त्रियां क्तिन्' (पा.सू. ३।३।९४) इत्यादौ स्त्र्यधिकारदर्शनात् स्वरितचिह्नबलेनात्राधिकारपदम्, अथवा व्याख्यया स्त्र्यधिकारं विनेत्यर्थो जायते । 'असरूप' इत्यत्र पर्युदासार्थको नञ् वर्तते, प्रसज्यप्रतिषेधस्वीकारेऽ समर्थसमासकल्पना-वाक्यभेदक्रियाध्याहारकार्यैः महागौरवात् । अस्त्रियामित्यत्र तु प्रसज्यप्रतिषेध एव नञर्थो विद्यते, पृथक्

---

* *सहप्राध्यापकः ने.सं.वि.पिण्डेश्वरविद्यापीठम्, धरानः ।*

वाक्येन क्रियाध्याहारस्यावश्यकत्वात् । सूत्राणां छान्दसत्वादसमर्थसमासकल्पनमेतादृशि स्थले स्वाभाविकम् ।

**२.समस्याकथनम्, उद्देश्यनिर्धारणन्तथाऽनुसन्धानविधिः**

**२.१ समस्याकथनम्**

समस्या समाधानस्य जनन्यस्ति । विना समस्यां समाधानं न भवति । अस्यानुसन्धानमूलकस्य लेखस्यापि समस्या विद्यते । वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इतिसूत्रं महत्त्वसम्पन्नं विद्यते । अस्य सूत्रस्य समीक्षा महनीयो विषयोऽस्ति । अस्य महत्त्वं सम्यक्तया इदानीं पर्यन्तं नोद्घाटितम् । अस्य सूत्रस्य समीक्षात्मकोऽर्थोद्घाटनाभाव एवास्य सूत्रस्य महती समस्या विद्यते ।

**२.२. उद्देश्यनिर्धारणम्**

उद्देश्योऽनुसन्धानस्य मार्गप्रशस्ता भवति । विनोद्देश्यम् अनुसन्धानकार्यं पथभ्रष्टं भवति । सोद्देश्यम् अनुसन्धानं तथ्यपरकं प्रामाणिकञ्च वरिवर्ति । अस्य लेखस्यापि निश्चित उद्देश्यो विद्यते । सोद्देश्यः लेखः समस्यासमाधानाय सक्षमोऽनुभूयते । अस्मिाल्लेखे वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इति सूत्रस्य विशदं विवेचनं विहितमस्ति । अस्य सूत्रस्य समीक्षात्मकार्थविधानमस्य सूत्रस्योद्देश्यो विद्यते ।

**२.३. अनुसन्धानविधिः**

अनुसन्धानविधिं विनाऽनुसन्धानकार्यं सम्यक्तया न सम्भवति । अनुसन्धानविधयो बहवो विलसन्ति । अनुसन्धानात्मकलेखे कश्चन एको विधिरवलम्बनीयो भवति । अत्रानुसन्धानकार्येऽपि केचन विधयः स्वीकृता विद्यन्ते । अत्र सामग्रीसङ्कलनाय पुस्तकालयविधिरङ्गीकृतो विद्यते । सूत्रं पुरस्कृत्य समीक्षाविधाने निगमनात्मकः विधिरवलम्बितो वर्तते । यथास्थानं व्याख्याविश्लेषणविध्यपि स्वीकृते स्तः । टिप्पणीविधानं, सन्दर्भग्रन्थसूचीकरणञ्च लेखकमितिपद्धतितः (एपिए) व्यवस्थितमस्ति ।

**३. सीमाङ्कनम्**

अनुसन्धानात्मकलेखस्य निश्चितं सीमाङ्कनं भवति । सीमाङ्कनेन अनुसन्धानकार्यम् अनावश्यकविषये न विचलति । अस्मिन्नाल्लेखे वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इतिसूत्रस्य सपदकृत्यं समीक्षात्मकार्थविधानम्, अस्य प्रयोगविषयः, उदाहरणप्रत्युदाहरणानि, अस्य विषये लिखितायाः परिभाषायाः समीक्षणम् इत्यादयो विषया विवेचिताः सन्ति । एष एवास्य अनुसन्धानमूलकस्य लेखस्य सीमाङ्कनं विद्यते ।

**४. पूर्वकार्यसमीक्षा**

पूर्वकार्यसमीक्षा शोधकार्य आवश्यकी भवति । अनया कति कार्यं सम्पादितम् ? कत्यवशिष्टम् ? इति ज्ञायते । अतः शोधकार्यस्य महत्तां सिध्यति । वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इत्येकं महत्त्वपूर्णं सूत्रमस्ति । अस्य विषये पाणिनीयव्याकरणेषु सर्वत्र चर्चा प्राप्यते । अस्य सूत्रस्य चर्चाऽभावात् कृदन्तप्रकरणम् अपूर्णं भवति । कृदन्तप्रकरणस्य चर्चाऽभावे पाणिनीयं व्याकरणशास्त्रम् अपूर्णम् । अतः सूत्रस्यास्य महत्त्वं वरिवर्ति ।

वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इति सूत्रं प्रथमम् अष्टाध्याय्याम् पठितमस्ति । अत्र केवलः सूत्रपाठ एवास्ति । अर्थोदाहरणप्रत्युदाहरणाभावे सूत्रपाठेन केवलेन सूत्रविषयकं पूर्णं ज्ञानं न सम्भवति ( पा.सू. ३।१।९४) ।

लघुसिद्धान्तकौमुद्याः कृदन्तप्रकरणेऽस्य सूत्रस्य विषये चर्चा विद्यते । तत्र मेवलास्य सरलार्थो विहितोऽस्ति । तत्पश्चादन्यानि कृदन्तप्रकरणस्थानि सूत्राणि विलसन्ति । अत्र अस्य सूत्रविषयिका सम्यक् समीक्षा नास्ति (वरदराजः, २०७१ : पृ. १५३) ।

लघुसिद्धान्तकौमुद्या लघुटिप्पण्याम् अस्य सूत्रस्य विषये सामान्यं वर्णनं वर्तते । तत्र स्त्र्यधिकारोक्तविषये स्त्रियां क्तिन् (पा.सू. ३।३।९४ ) तथा अ प्रत्ययात् (पा.सू. ३।३।१०२) इति द्वयोः सूत्रयोः तुलनां कृत्वा अप्रत्ययविषये क्तिन्प्रत्ययो न प्रवर्तते इति कथितमस्ति । अनेन वर्णनेनास्य सूत्रस्य सम्यक् समीक्षा न भवति (त्रिपाठी, २०७१ : पृ. १५३) ।

मध्यकौमुद्यामपि वाऽसरूपोऽस्त्रियाम् इतिसूत्रस्य वृत्तिर्विद्यते । तत्र तस्योदाहरणप्रत्युदाहरणानां यथास्थाने चर्चा नास्ति । सामान्यार्थविधानेनास्य ज्ञानम् प्रायोऽसम्भवमेव । अत्र सूत्रस्य सम्यग् विवेचनं न मिलति (वरदराजः,१९७५ : पृ.२७३) ।

मध्यकौमुद्याः प्रभाकरीटीकायाम् एतत्सूत्रविषयिका काचिच्चर्चा प्राप्यते । तत्रास्य सूत्रस्य पारिभाषिकत्वं सूचितमस्ति । तत्रोत्सर्गापवादविषये स्पष्टता विद्यते । कानिचिद् उदाहरणान्यपि विलसन्ति । तत्र सूत्राणां पदकृत्यं नास्ति । वृत्तेः समीक्षा न प्राप्यते । एतत्सूत्रविषयिकानां परिभाषाणां विवेचना न मिलति । एतेषाम् अभावे सूत्रस्यास्य सरलतया ज्ञानं न भवति (शास्त्री, १९७५ः पृ.२७३) ।

वैयाकरणसिद्धान्तकौमुद्याम् वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इतिसूत्रविषये काचिच्चर्चा प्राप्यते । तत्र पुरा सूत्रस्यास्य प्रकारः प्रदर्शितः, पश्चात् वृत्तिः प्रस्तुताऽस्ति । एतेन मात्रेण सूत्रस्यास्यार्थो न प्रस्फुटति । अत्रोदाहरणसमीक्षादयो न सन्ति । एतत्सूत्रसम्बन्धन्यः परिभायाश्चर्चा न प्राप्यते (दीक्षितः, १९८२ : पृ. ५५९) ।

तत्त्वबोधिनीव्याख्यायाम् एतत्सूत्रसम्बन्धिनी काचिदधिका चर्चा प्राप्यते । तत्रास्य प्रयोजनम्, उदाहरणानि, अधिकृतसूत्राणि, बाध्यबाधकभावविषयः, स्त्र्यधिकारोक्तं विनेति पदस्य प्रयोजनम् इत्यादयो विषयाः सम्पादिता विद्यन्ते । सर्वेषामुदाहरणप्रत्युदाहरणानि च व्यवस्थितानि वर्तन्ते । परन्त्वत्र सूत्रस्यैतस्य समीक्षात्मकोऽर्थो नास्ति । एतत्सूत्रसम्बन्धिनीनां परिभाषाणां विषये न किमप्युक्तं वर्तते (सरस्वती, १९८२ : पृ. ५५९) ।

एतेषां ग्रन्थानां पर्यालोचनेन तेषु प्राप्ता न्यूनता ज्ञाताः । अस्मिाल्लेखे ता न्यूनताः समाप्ताः सन्ति । अत्र वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इतिसूत्रस्य प्रकारः प्रदर्शितः, ततः समीक्षात्मकोऽर्थो प्रदर्शितः, उदाहरणप्रत्युदाहरणानि व्यवस्थितानि, पदकृत्यञ्च कृतम्, समस्तपदानां विग्रहश्च प्रदर्शितः, एतत्सूत्राधिकृतानधिकृतसूत्राणां विवरणं प्रत्तम्, एतत्सूत्रविषयिकानां परिभाषाणां सम्यग् विवेचना विहिता वर्तन्ते । अतोऽस्मिाल्लेखेऽन्यतो नवीनाः पक्षाः विलसन्ति ।

**५. वाऽसरूपविधिविमर्शः**

वाऽसरूपोऽस्त्रियाम् (पूर्ववते) इतिसूत्रस्य प्रयोजनं त्वपवादेन नित्ये बाधे प्राप्ते क्वचिदुत्सर्गस्य प्रवृत्तिर्भवेदिति वर्तते । अन्यथा भू धातोः 'अचो यत्' (पा.सू. ३।१।९७) इत्यपवादसूत्रेण यति प्रत्यये गुणेऽवादेशे 'भव्यम्' इति तथा कृधातोः 'ऋहलोर्ण्यत्' (पा.सू. ३।१।१२४) इतिसूत्रेण ण्यति प्रत्यये वृद्धौ 'कार्यम्' इति सिद्धौ 'तव्यत्तव्यानीयरः' (पा.सू.३।१।९६) इत्यादिसूत्रेण तव्यानीयरादिप्रत्यया न स्युः, 'पूर्वपरनित्यान्तरङ्गा-पवादानामुत्तरोत्तरं बलीयः' (भट्टः, ई१९९७; पृ. १५२) इतिपरिभाषाबलेनापवादसूत्रेण

नित्येन बाधात् । प्रकृतपरिभाषासूत्रानुसारेण तु तव्य-अनीयर्-यत्प्रभृतयः प्रत्यया भिन्नरूपकाः सन्ति, अर्थादेषां समानरूपं नास्ति । अस्मादेते विकल्पेन बाध्यबाधका जायन्ते । अपवादसूत्रप्रवृत्त्यनन्तरं पक्ष उत्सर्गसूत्रमपि प्रवर्तते । अतो 'भवितव्यम्, भवनीयम्, कर्तव्यम्, करणीयम्' इमानि रूपाणि चात्र भवन्ति ।

सरूपकाः प्रत्ययास्तु नित्येन बाध्यन्ते । अन्यथा 'असरूपः' इतिपदमनर्थकं स्यात् । यथा 'कर्मण्यण्' (पा.सू. ३।२।१) इत्युत्सर्गसूत्रं तथा 'अतोऽनुपसर्गे कः' (पा.सू. ३।२।३) इत्यपवादसूत्रं स्तः । 'कुम्भकारः' इत्यादिप्रयोगे 'कर्मण्यण' (पूर्ववत्) इतिसूत्रस्य निवृत्तिर्जाताऽस्ति । 'आतोऽनुपसर्गे कः' ( पूर्ववत्) इतिसूत्रं निरवकाशं वर्तते । 'कम्बलं ददातीति कम्बलदः' इत्यत्र 'कर्मण्यण्' (पूर्ववत्) इत्यण् प्राप्नोति । 'आतोऽनुपसर्गे कः' (पूर्ववत्) इति चात्र कप्रत्ययं प्राप्नोति । अण्-कप्रत्यययोः निरनुबन्धकावस्था 'अ' इति भवति । सानुबन्धकेषु प्रत्ययेषु प्रकृतसूत्रं न प्रवर्तते, 'नानुबन्धकृतमसारूप्यम्' इतिपरिभाषाबलात् (भट्टः, ई १९९७; पृ. ३१) । अत्रोभयोः सूत्रयोः प्राप्तयोः 'वाऽसरूपोऽस्त्रियाम्' (पा.सू. ३।१।९४) इतिसूत्रबलेन 'आतोऽनुपसर्गे कः' (पूर्ववत्) इत्यपवादसूत्रं निरवकाशं सत् 'कर्मण्यण्' (पूर्ववत्) इत्युत्सर्गसूत्रं नित्येन बाधते । अतः कप्रत्यये सति 'कम्बलदः' इतिरूपं सिध्यति ।

स्त्र्यधिकारे तु 'वाऽसरूपोऽस्त्रियाम्' इतिसूत्रं न प्रवर्तते, प्रकृतसूत्रस्य 'अस्त्रियाम्' इति पदबलात् । एतेन स्त्र्यधिकारेऽसरूपाः प्रत्यया अपि नित्येन बाध्यन्ते । तत्र विकल्पविधानं न भवति । यथा 'स्त्रियां क्तिन्' (पूर्ववत्) इत्युत्सर्गसूत्रं तथा 'अ प्रत्ययात्' (पा.सू. ३।३।१०२) इत्यपवादसूत्रम् । 'कृतिः' इत्यादिस्थलेषु 'स्त्रियां क्तिन्' इति सूत्रस्यावकाशो जायते । 'अ प्रत्ययात्' (पूर्ववत्) इति निरवकाशो वर्तते । कृ धातोः सनि द्वित्वादिकार्ये 'चिकीर्ष' इत्यत्र 'सनाद्यन्ता धातवः' (पा.सू.३।१।३२) इतिसूत्रेण धातुसंज्ञायां 'स्त्रियां क्तिन्' (पूर्ववत्) इति क्तिन्प्रत्ययं प्राप्नोति तथा 'अ प्रत्ययात्' (पूर्ववत्) इति अ-प्रत्ययं च प्राप्नोति । अत्रोभयोः प्राप्तयोः भिन्ने सरूपे सत्यपि 'अस्त्रियाम्' इतिशब्दबलात् निरवकाशेनापवादेन 'अ प्रत्ययात्' (पूर्ववत्) इतिसूत्रेण 'स्त्रियां क्तिन्' (पूर्ववत्) इति सावकाशमुत्सर्गसूत्रं नित्येन बाध्यते । तदनन्तरमकारे प्रत्यये टापि 'चिकीर्षा' इतिरूपं सिध्यति ।

षड्विधेषु सूत्रेषु परिभाषासूत्रमिदं वर्तते । परिभाष्यतेऽनयेति व्युत्पत्त्या परिभाषा सूत्रं भवति । अधिकारस्वीकारे तु 'स्वरितेनाधिकारः' (पा.सू. १।३।११) इति सूत्रप्रवृत्त्या स्वरितत्वकल्पने गौरवं भवेत् । किञ्च 'आसित्वा भुङ्क्ते, आस्यते भोक्तुम्' इत्यादिरूपाणि च न सिध्यन्ति । इह भोजनसमय आसनस्य पूर्वकालताऽवगम्यते । अत्र क्त्वाप्रत्यय-लकारौ द्वावेव भावार्थकौ स्तः । समानविषयत्वादुभयोः बाध्यबाधकाभावः स्यात् (सरस्वती, १९८२; पृ. ५६०) ।

'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रानुसारेण 'वर्णात्कारः' (दीक्षितः, १९८२; पृ. ६६१) तथा 'रादिफः' (दीक्षितः., १९८२; पृ. ६६२) इतिवार्तिकयोरुभयोर्मध्ये बाध्यबाधकाभावः स्यात्, प्रत्ययस्यासरूपत्वात् । अत्र तत्त्वबोधनीकारो ज्ञानेन्द्रसरस्वतीमहोदय इष्टापत्तिं मनुते । अस्याचार्यस्यानुसारेण रेफ-रकारावुभावेव प्रयोगौ भवतः । एष आचार्यः 'शकि लिङ् च' (पा.सू. ३।३।१७२) इतिसूत्रे चकारपाठात् ज्ञापकात् सूत्रमिदमनित्यं स्वीकुरुते । अनेन स्त्र्यधिकारादुत्तरेषु क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति सिद्धान्तः सङ्गच्छते (सरस्वती, १९८२; पृ. ५६०) । अस्य

पोषिका एका परिभाषा चास्ति 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति' इति (भट्टः, १९९७; पृ. ३१०) । 'नपुंसके भावे क्तः' (पा.सू. ३।३।११४) इतिसूत्रानुसारेण हस् धातोः क्तप्रत्यये, 'ल्युट् च' (पा.सू. ३।३।११५) इतिसूत्रानसारेण ल्युट्प्रत्यये 'हसितम्, हसनम्' इति सिध्येते । 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति' (भट्टः, १९९७; पृ. ३०७) इतिपरिभाषाबलात् पुनश्च हस् धातोः 'भावे' (पा.सू. ३।३।११८) इतिसूत्रेण भावे घञि 'हासम्' इति स्यात् इत्याशङ्कायामेषा परिभाषोपतिष्ठते 'क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति' इति । क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्विकल्पेन न बाधते किन्तु नित्येन बाधते इति तस्याः परिभाषाया आशयो विद्यते । अत्र ल्युट्क्तघञामसरूपो विधिर्विद्यते । अतो विकल्पेन बाधापत्तिः स्यात् । एतत्परिभाषाबलेन नित्येन बाधो भवति । कर्मणि घञि तु 'हासः' इति सम्पद्यते, भिन्नार्थत्वात् ।

'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रविषयेऽपरा परिभाषा चास्ति । सैता 'ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति' इति (भट्टः, १९९७; पृ. ३१०) । अत्र समस्या एषा, 'आक्वेस्तच्छीलतद्धर्म-तत्साधुकारिषु' (पा.सू. ३।२।१२३) अस्य सूत्रस्याधिकारे तच्छीलाद्यर्थे 'तृन्' (पा.सू. ३।२।१३५) इतिसूत्रेण तृन्प्रत्ययो विधीयते । 'ण्वुल्तृचौ' (पा.सू. ३।१।१३३) इतिसूत्रस्यापवादो विद्यते 'तृन्' (पूर्ववत्) इतिसूत्रम् । परन्तु 'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रानुसारेण एषोऽपवादो विकल्पेन कार्यं करोति । अतः 'तृन्' (पूर्ववत्) इतिसूत्रस्य विकल्पे 'ण्वुल्तृचौ' (पूर्ववत) इतिसूत्रेण ण्वुल्प्रत्ययः स्यात् । तस्य बाधनार्थमेषा परिभाषा कार्यं करोति । 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' (पूर्ववत) इति परिभाषाया आशयो विद्यते, ताच्छीलिकेषु प्रत्ययेषु 'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रं नित्येन प्रवर्तते । अतः 'तृन्' (पूर्ववत्) इतिसूत्रेण 'ण्वुल्तृचौ' (पूर्ववत्) इतिसूत्रं नित्येन बाध्यते ।

'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रविषयेऽपरा चैका परिभाषा विद्यते 'लादेशेषु वाऽसरूपविधिर्नास्ति' (भट्टः, १९९७; पृ. ३१२) इति । एषा परिभाषाऽपि 'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रं बाधते । अत्र समस्याऽस्ति, 'श्वः पक्ता' इत्यर्थे 'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रानुसारेण 'अनद्यतने लुट्' (पा.सू. ३।३।१५) इति सूत्रविषये 'लृट् शेषे च' (पा.सू. ३।३।१३) इतिसूत्रेण लृट्लकारे 'श्वः पक्ष्यति' इत्यपि स्यात् । अत आवश्यक्येषा परिभाषा 'लादेशेषु वासरूपविधिर्नास्ति' (पूर्ववत्) इति । अस्या आशयो वर्तते, लकारस्थानिकेष्वादेशेषु 'वाऽसरूपोऽस्त्रियाम्' (पूर्ववत्) इतिसूत्रं नित्येन बाधते । 'अनद्यतने लुट्' (पूर्ववत) इत्यपवादसूत्रमस्ति । अत एतत्सूत्रेण 'लृट् शेषे च' (पूर्ववत्) इतिसूत्रं नित्येन बाध्यते ।

प्रकृतसूत्रं 'धातोः' (पूर्ववत्) इतिसूत्राधिकार एव प्रवर्तते । अन्यथा तद्धितादावनिष्टापत्तिर्भवेत् । तेन देवस्यापत्यमित्यर्थे 'तस्यापत्यम्' (पा.सू. ४।१।९२) इत्युत्सर्गसूत्रं 'देवाद्यञञौ' (दीक्षित, १९८२; पृ. २७९) इतिवार्तिकेन विकल्पेन बाध्यते । एतेन देवशब्दात् यञ्-अञ्-अणः इत्येते सर्वे प्रत्यया विकल्पेन भवेयुः । न च अणञोरुभयोः प्रत्यययोः जातयोः दैवम् इति रूपं भवति, न कोऽपि फलभेद इति वाच्यम्; णकारञकारयोरितोः स्वरे फलभेदात् । अत्र यञणोः निरनुबन्धावस्थायां रूपस्य पार्थक्यं च जायते ।

**६. उपसंहारः**

वाऽसरूपोऽस्त्रियाम् (पूर्ववत्) इति जटिलं सूत्रं वरिवर्ति । विद्यार्थिनोऽस्य महत्त्वस्फोरणायासक्षमा भवन्ति । तेषां कृते सूत्रस्यास्यार्थविधानं महापर्वतलङ्घनवत् महाकठिनं बोभवीति । कतिपये संस्कृतस्य शिक्षकाः, प्राध्यापकाश्चास्य विषये शङ्कापङ्कग्रस्ता जायन्ते । अतः सम्यक्तया सूत्रस्यास्यार्थविधानं सर्वेषां कृते सुलभं न भवति । सूत्रमिदं महत्त्वपूर्णं वरिवर्ति । अस्य सूत्रस्यार्थाज्ञाने धात्वधिकारे कृदन्तप्रकरणे महती समस्याऽऽयाति । बाध्यबाधकभावाभावे पाठकोऽनिर्णयबन्धको जायते । अत्रासरूपशब्दस्यार्थोऽस्पष्टो वर्तते । अस्य सूत्रस्य मुख्यो विषयोऽसरूपशब्द एव विद्यते । एतत् सूत्रं स्त्र्यधिकारे न लगाति । धात्वधिकारविधौ सूत्रमिदं सरूपे प्रत्यये नित्येन, असरूपे प्रत्यये विकल्पेन प्रवर्तते । सरूपः कः ? असरूपः कः ? अनयोर्निर्णयः शङ्कास्पदो वर्तते । अस्मिन् सूत्रविषये काश्चन परिभाषाश्च विलसन्ति । ता एतत्सूत्रविषयकं नियमं प्रदर्शयन्ति । तासां परिभाषाणां ज्ञानं विना सूत्रज्ञानमपूर्णं भवति । उत्सर्गाणां बाधकानाञ्च प्रत्ययानामुदाहरणानि प्रत्युदाहरणानि च ज्ञेयानि भवन्ति । अस्मिाल्लेख एतेषां सर्वेषां विषयानां सम्यक् समीक्षा प्राप्यते । अस्मादनुसन्धानात् पाणिनीयव्याकरणस्याध्येतारोऽध्यापकाश्चोपकृता भवन्ति ।

**सन्दर्भग्रन्थसूची**


त्रिपाठी, नारायणदत्तः (वि.सं.२०७१) लघुटिप्पणी लघुसिद्धान्तकौमुद्याः, गोरखपुरम् : गीताप्रेसम् ।

दीक्षितः, भट्टोजिः (वि.सं. १९८२) सिद्धान्तकौमुदी, मुम्बई : खेमराजः श्रीकृष्णदासः ।

पाणिनिः (सन् १९८१) अष्टाध्यायी, वाराणसी : चौखम्बासुरभारतीप्रकाशनम् ।

भट्टः, नागोजिः (ई.सं.१९९७) परिभाषेन्दुशेखरः, वाराणसी : चौखम्बासुरभारती प्रकाशनम् ।

वरदराजः, (वि.सं. २०७१) लघुसिद्धान्तकौमुदी, गोरखपुरम् : गीताप्रेसम् ।

... (ई.सं. १९७५) मध्यसिद्धान्तकौमुदी, दिल्ली : मोतीलालः बनारसीदासः ।

शास्त्री, विश्वनाथः (ई.सं. १९७५) प्रभाकरीविवृतिः मध्यसिद्धान्तकौमुद्याः टीका, दिल्लीः : मोतीलालः बनारसीदासः ।

सरस्वती, ज्ञानेन्द्रः (इंस.१९८९) तत्त्वबोधनी सिद्धान्तकौमुदीटीका, मुम्बई : खेमराजः श्रीकृष्णदासः ।

सिंहः, अमरः (वि.सं. १९९३) अमरकोषः, गैरीधारा काठमाण्डौ : पं.लक्ष्मीप्रसादगौतमः ।